# श्री सप्तशती रहस्य त्रयं

**अस्य श्री सप्तशती रहस्य त्रयस्य | नारायण ऋषि रनुष्टुप्छन्द: |
महाकाली महालक्ष्मी महासरस्वत्यो देवता | यथोक्त फलावाप्त्यर्थ जपे विनियोग: ||**

## राजोवाच

भगवन्नवतारा मे चण्डिकाया स्त्वयोदिता: |
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तु मर्हसि || १ ||
आराध्यं यन्मया देव्या: स्वरूपं येन च द्विज |
विधिना ब्रूहि सकलं यथावत्प्रणा तस्य मे || २ ||

## ऋषि रुवाच

इदं रहस्यं परममनाख्येयं प्रचक्षते |
भक्तोसीति न मे किञ्चित्तवावाच्यं नराधिप || ३ ||

सर्वस्याद्या महालक्ष्मी स्त्रिगुणा परमेश्वरी |
लक्ष्या लक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता || ४ ||

मातुलुङ्गं गदां खेटं पानपात्रं च बिभ्रती |
नागं लिङ्गं च योनिं च बिभ्रती नृप मूर्धनि || ५ ||

तप्तकाञ्चन वर्णाभा तप्तकाञ्चन भूषणा |
शून्यं तदखिलं स्वेन पूरयामास तेजसा || ६ ||

शून्यं तदखिलं लोकं विलोक्य परमेश्वरी |
बभार परमं रूपं तमसा केवलेन हि || ७ ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

सा भिन्नाञ्जन संकाशा दंष्ट्राङ्कित वरानना |
विशाल लोचना नारी बभूव तनुमध्यमा || ८ ||

खड्ग पात्रशिर:खेटैरलंकृत चतुर्भुजा |
कबन्धहारं शिरसा बिभ्राणा हि शिर:स्त्रजम || ९ ||

सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्तमा |
नाम कर्म च मे मातर्देहि तुभ्यं नमो नम: || १० ||

तां प्रोवाच महालक्ष्मीस्तामसीं प्रमदोत्तमाम् |
ददामि तव नामानि यानि कर्माणि तानि ते || ११ ||

महामाया महाकाली महामारी क्षुधा तृषा |
निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया || १२ ||

इमानि तव नामानि प्रतिपाद्यानि कर्मभि: |
एभि: कर्माणि ते ज्ञात्वा योधीते सोश्नुते सुखम् || १३ ||

तामित्युक्त्वा महालक्ष्मी: स्वरूपमपरं नृप |
सत्त्वाख्येनाति शुद्धेन गुणेनेन्दुप्रभं दधौ || १४ ||

अक्षमालाङ्कुश धरा वीणापुस्तक धारिणी |
सा बभूव वरा नारी नामान्यस्यै च सा ददौ || १५ ||

महाविद्या महावाणी भारती वाक् सरस्वती |
आर्या ब्राह्मी कामधेनु र्वेदगर्भा च धीश्वरी || १६ ||

अथोवाच महालक्ष्मी र्महाकालीं सरस्वतीम् |
युवां जनयतां देव्यौ मिथुने स्वानुरूपत: || १७ ||



With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

www.viswakalyanam.org

इत्युक्त्वा ते महालक्ष्मी: ससर्ज मिथुनं स्वयम् |
हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ || १८ ||

ब्रह्मन् विधे विरिञ्चेति धातरित्याह तं नरम् |
श्री: पद्मे कमले लक्ष्मीत्याह माता च तां स्त्रियम् || १९ ||

महाकाली भारती च मिथुने सृजत: सह |
एतयोरपि रूपाणि नामानि च वदामि ते || २० ||

नीलकण्ठं रक्त बाहुं श्वेताङ्गं चन्द्रशेखरम् |
जनयामास पुरुषं महाकाली सितां स्त्रियम् || २१ ||

स रुद्र: शंकर: स्थाणु: कपर्दी च त्रिलोचन: |
त्रयी विद्या कामधेनु: सा स्त्री भाषाक्षरा स्वरा || २२ ||

सरस्वती स्त्रियं गौरीं कृष्णं च पुरुषं नृप |
नयामास नामानि तयोरपि वदामि ते || २३ ||

विष्णु: कृष्णो हृषीकेशो वासुदेवो जनार्दन: |
उमा गौरी सती चण्डी सुन्दरी सुभगा शिवा || २४ ||

एवं युवतय: सद्य: पुरुषत्वं प्रपेदिरे |
चक्षुष्मन्तो नु पश्यन्ति नेतरेऽतद्विदो जना: || २५ ||

ब्रह्मणे प्रददौ पत्नीं महालक्ष्मी र्नृप त्रयीम् |
रुद्राय गौरीं वरदां वासुदेवाय च श्रियम् || २६ ||

स्वरया सह सम्भूय विरिञ्चोण्डमजीजनत् |
बिभेद भगवान् रुद्रस्तद् गौर्या सह वीर्यवान् || २५ ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

अण्डमध्ये प्रधानादि कार्यजातमभून्नृप |
महाभूतात्मकं सर्व जगत्स्थावरजङ्गमम् || २८ ||

पुपोष पालयामास तल्लक्ष्म्या सह केशव: |
संजहार जगत्सर्व सह गौर्या महेश्वर: || २९ ||

महालक्ष्मीर्महाराज सर्वसत्त्वमयीश्वरी |
निराकारा च साकारा सैव नानाभिधानभृत् || ३० ||

नामान्तरैर्निरूप्यैषा नामन नान्येन केनचित् || ३१ ||

**इति श्री सप्तशती रहस्य त्रयं सम्पूर्ण**





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133